**कक्षा-X**

**सङ्कलनात्मकं मूल्याङ्कनम् (प्रथम सत्रम्) 2013-14**

**विषयः संस्कृतम् सम्प्रेषणात्मकम्**

**निर्धारितसमयः - होरात्रयम्** **पूर्णाङ्काः - 90**

*निर्देशाः -* *(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः*

*खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः*

*खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः*

*खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः*

*(2) सर्वे प्रश्नाः अनिवार्याः।*

*(3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमणैव लेखनीयानि।*

*(4) प्रश्नसंख्या अवश्यं लेखनीया।*

*(5) उत्तराणि संस्कृतेन एव लेखनीयानि।*

**खण्डः 'क' (अपठित-अवबोधनम्)** **10 अङ्काः**

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

समानव्यवहारस्य अभावे मानवाः परस्परं कलहं कुर्वन्ति। मानवाय अपशब्दः न रोचते, परम् असौ परस्मै दुर्वचनं भाषते। आत्मने अत्याचारः न रोचते, परम् परेषु अत्याचारं सर्वसाधारणीं वार्तां मन्यते। आत्मनः, मातुः, भगिन्याः कन्यायाः च अपमानं सोढुम् न शक्नोति मानवः, परं परेषां मातृभिः, भगिनीभिः कन्याभिः च सह अभद्र-व्यवहारं कुर्वन् सः न लज्जते। मानवेन ज्ञातव्यम् यत् यादृशैः व्यवहारैः आत्मानं दुःखं भवति, तादृशैः अन्येऽपि दुःखम् अनुभवन्ति।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) मानवाय कः न रोचते?

(ii) कस्य अभावे मानवाः कलहं कुर्वन्ति?

(II) पूर्णवाक्येन उत्तरत - (2x2=4)

(i) मानवेन किं ज्ञातव्यम्?

(ii) मानवः किं सोढुम् न शक्नोति?

(III) यथानिर्देशमुत्तरत - (½x4=2)

(i) 'तादृशैः अन्येऽपि दुःखम् अनुभवन्ति' इति वाक्ये 'अनुभवन्ति' क्रियायाः कर्तृपदम् किम्?

(अ) दुःखम् (ब) मानवाः

(स) अन्ये (द) तादृशैः

(ii) 'वार्तां' इत्यत्र किं विशेषणपदम्?

(अ) सर्वसाधारणीं (ब) परम्

(स) अत्याचारं (द) आत्मने

(iii) 'सः न लज्जते' अस्मिन् वाक्ये 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) मात्रे (ब) मानवाय

(स) कन्यायै (द) देवाय

(iv) 'आत्मने' पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) परस्मै (ब) यादृशैः

(स) व्यवहारैः (द) असौ

(IV) उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत। (2)

**खण्डः (ख) रचनात्मकं कार्यम्** **15 अङ्काः**

प्र2. चित्रं दृष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनम् पञ्चसंस्कृतवाक्येषु कुरुत - (2x5=10)

| मञ्जूषा |
|---|
| पुरुषाः, वाहनम्, आपणे, भ्रमन्ति, वृक्षौ, कुक्कुरः, आपणस्य, महिला, धावति, आपणकः, तोलयति, राजमार्गस्य, वस्त्रम्, शकटिका |




अथवा

'विद्यालये वनमहोत्सवः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत। (2x5=10)

| मञ्जूषा |
|---|
| अनेके पादपाः, आरोपिताः, मुख्यातिथिः, अनेके छात्राः, गृहात्, पादपाः, आनीताः, जलेन, सिञ्चिताः, वृक्षाणाम्, महत्त्वम्, तेषाम्, उपयोगिता, पर्यावरण-रक्षायै, अवबोधिताः, वृक्षाणाम्, रक्षा |

प्र3. भवान् माधवः। भवतः मित्रं दिल्ली नगरे वसति। भवतः विद्यालये बालदिवसः मानितः। तस्य विषये निजमित्रं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत - (½x10=5)

| मञ्जूषा |
|---|
| विद्यालये, माधवः, मान्यते, नवदिल्लीतः, विकास, प्राप्तवान्, आयोजिता, उल्लासेन, समर्पितम्, आयोजनम् |

110, आदर्शनगरम्

(1)________

तिथिः __________

प्रिय मित्र (2)________।

सस्नेहं नमस्ते।

अत्र कुशलं तत्रास्तु। अस्मिन् पत्रे अहं निजविद्यालये आयोजितस्य एकस्य समारोहस्य वर्णनं करोमि। त्वम् जानासि एव यत् नवम्बर चतुर्दश-दिनांकः स्वर्गीय नेहरोः जन्मदिनम् अस्ति। श्रीनेहरूणा निजजीवनम् भारतस्य बालकेभ्यः (3)________ आसीत्। अतः अनेकवर्षेभ्यः एतत् दिनं बालदिवसरूपेण (4)________। दिन-त्रयपूर्वम् अस्माकं विद्यालये अपि महता (5)________ एषः उत्सवः मानितः। अस्मिन् अवसरे सम्पूर्णनगरस्य बालकाः अस्माकं (6)________एव एकत्रीभूताः आसन्। प्रारम्भे कविताप्रतियोगिता (7)________ तदन्तरम् विविधखेलानाम् (8)________ कृतम्। कविता - प्रतियोगितायाम् अस्माकं विद्यालयः प्रथमं स्थानं (9)________। अन्ते जिलाधीशः विजेतृभ्यः पुरस्कारान् वितीर्णवान्। पितृभ्याम् नमः।

भवदीयः अभिन्नमित्रम्

(10)________

**खण्डः (ग) अनुप्रयुक्त-व्याकरणम्** **30 अङ्काः**

प्र4. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x5=5)

(I) <u>तेनैव</u> शुद्धम् लिखितम्।

(अ) तेन + इव (ब) तेन + ऐव

(स) तेन + एव (द) तेनै + एव

(II) कः <u>शुचिरिह</u>?

(अ) शुचिर् + इह (ब) शुचिस् + इह

(स) शुचिरि + ह (द) शुचिः + इह

(III) <u>पापिनाम् + च</u> सदा दुःखम्।

(अ) पापिनाम्च (ब) पापिनाञ्च

(स) पापिनामच (द) पापिनान्च

(IV) यथा + इच्छम् दुग्धम् पिब।

(अ) यथेच्छम्  (ब) यथैच्छम्

(स) यथोच्छम्  (द) यथच्छम्

(V) तच्छरेण खगः हतः।

(अ) तत् + छरेण  (ब) तत् + शरेण

(स) तच् + शरेण  (द) तच् + छरेण

प्र5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (1x6=6)

(I) सः कदापि न ऋतम् न वदति।

(अ) अर्तम्  (ब) अनृतम्

(स) अनतृम्  (द) अनारतम्

(II) वने एकः एव छिन्नद्रुमः अस्ति।

(अ) छिन्नं द्रुमः  (ब) छिन्नः एव द्रुमः

(स) छिन्नस्य द्रुमम्  (द) छिन्नः द्रुमः

(III) लोके विद्यासमं चक्षुः नास्ति।

(अ) विद्यां समम्  (ब) विद्या समं

(स) विद्यया समम्  (द) विद्यायां समम्

(IV) 'पञ्चतन्त्रम्' इति बालोपयोगी ग्रन्थः अस्ति।

(अ) पञ्चानां तन्त्राणां समाहारः  (ब) पञ्च तन्त्रम्

(स) पञ्चस्य तन्त्रम्  (द) पञ्चः च तत् तन्त्रम्

(V) पर्वतः इव उन्नतः वृक्षः अस्मिन् एव ग्रामे अस्ति।

(अ) पर्वतोन्नतः  (ब) पर्वतोन्नतौ

(स) पर्वत उन्नतम्  (द) पर्वतस्उन्नतः

(VI) उदररोगेषु त्रयाणां फलानां समाहारः इति गुणकारी भवति।

(अ) त्रिफलम  (ब) त्रिफली

(स) त्रिफलाः  (द) त्रिफला

प्र6. (क) अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत - (1x5=5)

(i) विपदाम् आदौ एव प्रतिक्रिया चिन्तनीया।

(ii) मम ________ (अर्थ + इनि) धनलाभमात्रेण सन्तोषं भजन्ते।

(iii) भारते ________ (उद्योग + ठक्) विकासः उत्तरोत्तरं वर्धते।

(iv) त्वया रक्तकमलानि ________ (चि + तव्यत्)।

(v) शक्तिमान् मनुष्यः किं कर्तुं न समर्थः?

प्र7. अधोलिखितवाक्येषु मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत - (1x5=5)

| मञ्जूषा |
| --- |
| वृथा, यथा, विना, इदानीम्, उच्चैः |

(i) धर्मं _________ जीवनं शून्यम्।

(ii) त्वम् _________ दोषारोपणं मा कुरु।

(iii) _________ माता वदति तथा पुत्री अपि वदति।

(iv) जाले पतितेन सिंहेन _________ रुदितम्।

(v) बालकाः _________ देशसेवायै तत्पराः स्युः।

प्र8. अधोलिखितसंवादे वाच्यानुसारं रिक्तस्थानं पूरयत - (1x5=5)

लता - त्वं रविवासरे किं कार्यं करोषि?

आशा - मया रविवासरे नृत्य-शिक्षणाय मातुलस्य गृहम् (1)_________ ।

लता - किं त्वं प्रातः उत्थाय ईश्वरं स्मरसि?

आशा - आम्, प्रातः उत्थाय मया (2)_________ स्मर्यते।

लता - किं त्वं पादपान् सिञ्चसि?

आशा - आम् मया पादपाः (3)_________ ।

लता - किं यूयम् वृक्षान् रक्षथ?

आशा - आम्, नूनम् (4)_________ वृक्षाः रक्ष्यन्ते।

लता - किं त्वं गृहवाटिकायां वृक्षान् आरोपयसि?

आशा - आम्, मया गृहवाटिकायां (5)_________ आरोपयन्ते।

प्र9. अङ्कान् संस्कृतेन लिखत - (1x4=4)

(i) पंजीकरणं प्रातः 8.30 प्रारभत।

(ii) काव्यालिप्रतियोगिता 9.15 आरभत।

(iii) चायपानं 12.00 वादने अभवत्।

(iv) 1.45 प्रतियोगिता समाप्ता जाता।

## खण्डः (घ) पठित-अवबोधनम् 35 अङ्काः

प्र10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत -

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् - भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रुक्ष-फलानि भक्षयिष्यामः। तच्छ्रुत्वा साश्रुनयनः यूथपतिः सगद्गदम् उक्तवान् - 'रसनास्वादलुब्धाः यूयम् अस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x1=1)

(i) कः सगद्गदम् अभवत्?

(ii) कपयः यूथपतेः वचनं कीदृशम् मत्वा अहसन्?

(II) पूर्णवाक्येन उत्तरत - (1x1=2)

वानरयूथपः कपीन् प्रति किम् अवदत्?

(III) निर्देशानुसारं विकल्पेभ्यः चित्वा उचितम् उत्तर लिखत - (1x2=2)

(i) 'कपयः' इति पदस्य विशेषणम् अस्ति -

(अ) अश्रद्धेयं (ब) मदोद्धताः

(स) वचनम् (द) प्रहस्य

(ii) 'भक्षयिष्यामः' इति क्रियापदस्य किम् कर्तृपदम्?

(अ) अहम् (ब) यूयम्

(स) वयम् (द) वानराः

प्र11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

कोऽनर्थफलः? मानः, का सुखदा? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) कः अनर्थफलः?

(ii) साधुजनमैत्री कीदृशी अस्ति?

(II) पूर्णवाक्येन उत्तरत - (1x1=1)

सर्वथा कः त्यागी भवति?

(III) निर्देशानुसारं शुद्धम् उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x2=2)

(i) 'सुखदा' इत्यस्य विशेष्यपदं किम्?

(अ) मानः (ब) सर्वथा

(स) साधुजनमैत्री (द) त्यागी

(ii) 'कुशलः' इति पदस्य अर्थः अस्ति -

(अ) चञ्चलः (ब) दक्षः

(स) आज्ञाकारी (द) मैत्री

प्र12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

महामात्यः - महाराज! अलम्! एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम्।

राजा - दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः। कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः। नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्तानां परित्राणाय एव मे निश्चयः। अस्य याच्ञा वृथा मा अस्तु। अतः वैद्यं आहूयताम्।

महामात्यः - यथादिशति भवान्।

राजा - भो विप्र! वैद्योक्तविधिना नीलोत्पलमिव उत्पाटितम् एकम् अक्षतं चक्षुः गृह्यताम्।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) वयम् अपि केषाम् परित्राणाय निश्चयम् कुर्याम?

(ii) नाहं स्वर्गं न मोक्षं वा कामये इति कः अवदत्?

(II) पूर्णवाक्येन उत्तरत - (1x1=1)

राजा याचकाय किं समर्पितवान्?

(III) निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x2=2)

(i) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) राज्ञे (ब) इन्द्राय

(स) अमात्याय (द) मनसे

(ii) 'पर्याप्तम्' इति अर्थे अत्र किं पदम् प्रयुक्तम्?

(अ) याच्ञा (ब) कार्पण्यम्

(स) अक्षतम् (द) प्रभूतम्

प्र13. (क) समुचितं भावं प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x2=2)

(I) अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।

(i) हे अर्जुन! इदं मनः चञ्चलं दुःखेन निग्रहीतुं शक्यम्।

(ii) मनसः वशीकरणाय निरन्तरं साधनां कुर्याम।

(iii) सांसारिकभोगाः नश्वराः अतः एतेषां पुनः पुनः चिन्तनेन तेषु विरक्तिः जायते। एषा विरक्तिः एव मनः वशीकर्तुं शक्नोति।

(iv) हे कुन्तीपुत्र! सततं अभ्यासेन सांसारिकभोगान् प्रति वैराग्येण च मनः वशं गच्छति।

(II) हा हन्त! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

(i) घोटकाः चिन्तयन्ति - 'अस्माभिः स्वस्वामिनः आज्ञापालनं न कृतम् अतः वयं दग्धाः।'

(ii) वैद्याः चिन्तयन्ति - वयं राजादेशं मत्वा वानराणां विनाशं न कुर्याम।

(iii) सूपकाराः दुःखिनः भवन्ति - 'स्वराजादेशस्य पालनं न कृतम् अस्माभिः अतः वयं दण्डिताः भविष्यामः।

(iv) वानराः पश्चात्तापं कुर्वन्ति - 'स्वगुरुजनस्य यूथपतेः उपदेशानाम् अस्माभिः अवहेलना कृता अतः वयं विनाशोन्मुखाः।

(ख) निम्नलिखितश्लोकस्य भावं विकल्पेभ्यः उचितं पदं चित्वा पूरयत - (1x2=2)

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥

भावार्थः - शिष्यस्य शिक्षाप्राप्तेः चत्वारि साधनानि सन्ति। सः शिक्षायाः प्रथमं चतुर्थांशं (1)________ प्राप्नोति। द्वितीयं चतुर्थांशं स्वमेधया लभते। एवमेव अन्यत् चतुर्थांशं (2)________ शिक्ष्यते, चतुर्थं चतुर्थांशं सहपाठिभिः प्राप्नोति।

(i) (अ) आपणात् (ब) पितुः
(स) पुस्तकात् (द) आचार्यात्

(ii) (अ) कालेन (ब) गृहात्
(स) मित्रात् (द) दूरदर्शनात्

प्र14. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयम् पूरयत - (1x4=4)

| मञ्जूषा |
|---|
| व्ययतः, अयम्, क्षयम्, अपूर्वः |

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

अन्वयः - भारति! तव (i)________ कोशः कः अपि (ii)________ विद्यते। (iii)________ वृद्धिम् आयाति सञ्चयात् च (iv)________ आयाति।

प्र15. वाक्येषु रेखांकितपदानां स्थाने विकल्पेभ्यः उचितं प्रश्नवाचकं पदं चित्वा प्रश्ननिर्माणं कुरुत - (1x4=4)

(i) राजा शिविः <u>अमात्यान्</u> उवाच।

(अ) के (ब) कान्
(स) कानि (द) केन

(ii) पठनस्य <u>षट्</u> गुणाः?

(अ) कः (ब) का
(स) किम् (द) कति

(iii) <u>कामः</u> ज्ञानस्य विज्ञानस्य च नाशं करोति।

(अ) कः (ब) कम्
(स) किम् (द) के

(iv) <u>विनीतस्य</u> वशे प्राणिगणः।

(अ) कस्याः (ब) कस्य

(स) कस्याम् (द) कस्मिन्

प्र16. अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनः लिखत - (½x8=4)

(i) मेषसूपकाराणां कलहं दृष्ट्वा यूथपतिः वानरान् वनं गन्तुम् प्रार्थयत्।

(ii) यदा अश्वाः अपि दग्धाः तदा कपिमेदसा अश्वाः रक्षणीयाः इति वैद्याः अवदन्।

(iii) राजपुत्राः वानरैः सह क्रीडन्ति स्म।

(iv) एकदा सूपकाराः मेषं ज्वलितकाष्ठेन अताडयन्।

(v) वानराः राजभोगं त्यक्त्वा वनं न अगच्छन्।

(vi) मेषः महानसं प्रविश्य यत् पश्यति तत् भक्षयति।

(vii) वानराः अचिन्तयन् - गुरुणां आज्ञा अविचारणीया हि।

(viii) मेषः हयशालां गत्वा भूमौ अलुठत्।

प्र17. रेखाङ्कितपदानां प्रसङ्गानुसारं उचितम् अर्थं चित्वा लिखत - (1x4=4)

(i) <u>हेयमपि</u> च किम्? अकार्यम्।

(अ) त्याज्यम् (ब) गम्यं

(स) ग्राह्यम् (द) करणीयम्

(ii) कलहान्तानि <u>हर्म्याणि</u>।

(अ) भवनानि (ब) उद्यानानि

(स) प्रकोष्ठाः (द) प्रासादाः

(iii) ध्यायतः विषयान् <u>पुंसः</u> संगस्तेषूपजायते।

(अ) पुण्यः (ब) आसक्तिः

(स) मानवस्य (द) क्रोधस्य

(iv) शक्रः तत्रैव <u>अन्तर्हितः</u> अभवत्।

(अ) विलुप्तः (ब) अग्रेस्थितः

(स) मध्येस्थितः (द) उपविष्टः